# Shri Tulasi Stotram

# શ્રીતુલસીસ્તોત્રમ્

## Document Information

Text title : tulasIstotram

File name : tulasIstotram.itx

Category : devii, tulasI, stotra, devI

Location : doc_devii

Author : Sri Pundarikaksha

Transliterated by : http://www.mypurohith.com

Proofread by : Anuradha anuradha at cs.com and Dr. Varagur S.V. Rajan sankrityaraja at shaw.ca

Latest update : September 8, 2004, NOvember 25, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીતુલસીસ્તોત્રમ્

જગદ્ધાત્રિ! નમસ્તુભ્યં વિષ્ણોશ્ચ પ્રિયવલ્લભે ।
યતો બ્રહ્માદયો દેવાઃ સૃષ્ટિ સ્થિત્યન્તકારિણઃ ॥ ૧॥

નમસ્તુલસિ કલ્યાણિ નમો વિષ્ણુપ્રિયે શુભે ।
નમો મોક્ષપ્રદે દેવિ નમઃ સમ્પત્પ્રદાયિકે ॥ ૨॥

તુલસી પાતુ માં નિત્યં સર્વાપદ્ભ્યોઽપિ સર્વદા ।
કીર્તિતાપિ સ્મૃતા વાપિ પવિત્રયતિ માનવમ્ ॥ ૩॥

નમામિ શિરસા દેવીં તુલસીં વિલસત્તનુમ્ ।
યાં દૃષ્ટ્વા પાપિનો મર્ત્યા મુચ્યન્તે સર્વકિલ્બિષાત્ ॥ ૪॥

તુલસ્યા રક્ષિતં સર્વં જગદેતચ્ચરાચરમ્ ।
યા વિનિહન્તિ પાપાનિ દૃષ્ટ્વા વા પાપિભિર્નરૈઃ ॥ ૫॥

નમસ્તુલસ્યતિતરાં યસ્યૈ બદ્ધાઞ્જલિં કલૌ ।
કલયન્તિ સુખં સર્વં સ્ત્રિયો વૈશ્યાસ્તથાઽપરે ॥ ૬॥

તુલસ્યા નાપરં કિઞ્ચિદ્દૈવતં જગતીતલે ।
યથા પવિત્રિતો લોકો વિષ્ણુસઙ્ગેન વૈષ્ણવઃ ॥ ૭॥

તુલસ્યાઃ પલ્લવં વિષ્ણોઃ શિરસ્યારોપિતં કલૌ ।
આરોપયતિ સર્વાણિ શ્રેયાંસિ વરમસ્તકે ॥ ૮॥

તુલસ્યાં સકલા દેવા વસન્તિ સતતં યતઃ ।
અતસ્તામર્ચયેલ્લોકે સર્વાન્ દેવાન્ સમર્ચયન્ ॥ ૯॥

નમસ્તુલસિ સર્વજ્ઞે પુરુષોત્તમવલ્લભે ।
પાહિ માં સર્વ પાપેભ્યઃ સર્વસમ્પત્પ્રદાયિકે ॥ ૧૦॥

ઇતિ સ્તોત્રં પુરા ગીતં પુણ્ડરીકેણ ધીમતા ।
વિષ્ણુમર્ચયતા નિત્યં શોભનૈસ્તુલસીદલૈઃ ॥ ૧૧॥

તુલસી શ્રીર્મહાલક્ષ્મીર્વિદ્યાવિદ્યા યશસ્વિની ।
ધર્મ્યા ધર્માનના દેવી દેવીદેવમનઃપ્રિયા ॥ ૧૨॥

લક્ષ્મીપ્રિયસખી દેવી દ્યૌર્ભૂમિરચલા ચલા ।
ષોડશૈતાનિ નામાનિ તુલસ્યાઃ કીર્તયન્નરઃ ॥ ૧૩॥

લભતે સુતરાં ભક્તિમન્તે વિષ્ણુપદં લભેત્ ।
તુલસી ભૂર્મહાલક્ષ્મીઃ પદ્મિની શ્રીર્હરિપ્રિયા ॥ ૧૪॥

તુલસિ શ્રીસખિ શુભે પાપહારિણિ પુણ્યદે ।
નમસ્તે નારદનુતે નારાયણમનઃપ્રિયે ॥ ૧૫॥

ઇતિ શ્રીપુણ્ડરીકકૃતં તુલસીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Dr. Varagur S.V. Rajan
sankrityaraja@shaw.ca and Anuradha

*Shri Tulasi Stotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*